"क्षौमं दुकूले स्यादट्टे पुंनपुंसकयोरिह ।
क्षौमन्तु शणजेऽपि स्यादतसीजे नपुंसकम् ॥"
(यथा, महाभारते । १।२००।३ ।
"कृष्णा च क्षौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्र्वास्तस्थौ प्रह्वा कृताञ्जली ॥")

क्षौमकः, पुं, (क्षुमा एव क्षौमः प्रज्ञादित्वात् अण् । ततः संज्ञायां कन् ।) चोरनामगन्धद्रव्यम् । इति केचित् ॥

क्षौमी, स्त्री, (क्षुमा एव इति स्वार्थे अणि वृद्धिः ततो गौरादित्वात् ङीष् ।) अतसी । इति रत्नमाला ॥ (विकारार्थे अणि) क्षुमानिर्म्मितकन्था । इति क्षौमशब्दटीकायां भरतः ॥

क्षौरं, क्ली, (क्षुरस्य कार्य्यं कर्म्म क्षुरकृतं कर्म्मेति भावः क्षुरस्येदं वा ।) क्षुरकर्म्म । कामान इति भाषा । तत्पर्य्यायः । मुण्डनम् २ भद्रकरणम् ३ वपनम् ४ परिवापनम् ५ । इति हेमचन्द्रः ॥ अस्य गुणः ।
"केशश्मश्रुनखादीनां कर्त्तनं संप्रसाधनम् ।"
संप्रसाधनं पवित्रीकरणमिति यावत् । इति राजवल्लभः ॥ * ॥ व्रतादिसंयमे क्षौरकर्म्माकरणे दोषो यथा,—
"व्रतानामुपवासानां श्राद्धादीनाञ्च संयमे ।
न करोति क्षौरकर्म्म अशुचिः सर्व्वकर्म्मसु ॥
स च तिष्ठति कुण्डेषु नखादीनाञ्च सुन्दरि ! ।
तदेव दिनमानाब्दं तद्भोजी दण्डताड़ितः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
नित्यक्षौरविहितनिषिद्धदिनादि यथाह राजमार्त्तण्डः ।
" न स्नानमात्रगमनोत्सुकभूषितानामभ्यक्तभुक्तरणकालनिरासनानाम् ।
सन्ध्यानिशाशनिकुजार्कदिनेषु रिक्ते
क्षौरं हितं प्रतिपदह्नि न चापि विष्ट्याम् ॥"*॥
"प्राचीमुखः सौम्यमुखोऽपि भूत्वा
कुर्य्यान्नरः क्षौरमनुत्कटस्थः ॥
उत्तरात्रितययाम्यरोहिणी-
रौद्रसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान्नरः ॥"
प्रेतकार्य्यं प्रतितप्रेतसंप्रदानकदासीघटदानविषयकम् । अन्यथा वक्ष्यमाणवचनविरोधः स्यात् ॥
"चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः ।
अक्षौरिभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्द्दिने ॥
मानं हन्ति गुरुः क्षौरे शुक्रं शुक्रो धनं रविः ।
आयुरङ्गारको हन्ति सर्व्वं हन्ति शनैश्चरः ॥"*॥
श्रीपतिरत्नमालायाम् ।
"आज्ञया नरपतेर्द्विजन्मनां
दारकर्म्मम्टतसूतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि
क्षौरमिष्टमखिलेषु चोड़ुषु ॥
देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये ।
क्षुरिकर्म्म न कुर्व्वीत जन्ममासे च जन्मभे ॥"*॥
वृद्धगार्ग्यः ।
"केशवमानर्त्तपुरं पाटलिपुत्रं पुरीमहिच्छत्रम् ।
दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणम् ॥ * ॥"
अत्र क्रमो वराहपुराणे ।
"श्मश्रुकर्म्म कारयित्वा नखच्छेदमनन्तरम् ॥"
इति ज्योतिस्तत्त्वम् ॥
अपि च । गोभिलः ।"केशश्मश्रुलोमनखानि वापयीत शिखावर्ज्जम् ।"इति शुद्धितत्त्वम् ॥*॥ अन्यच्च ।
"रोहिण्याञ्च विशाखायां मैत्रे चैवोत्तरासु च ।
मघायां कृत्तिकायाञ्च द्विजैः क्षौरं विवर्ज्जितम् ॥
कृत्वा तु मैथुनं क्षौरं यो देवांस्तर्पयेत् पितॄन् ।
रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत् ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
नापितगृहे क्षौरनिषेधो यथा,—
"स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्टञ्च चन्दनम् ।
नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥
रवौ दुःखं सुखं चन्द्रे कुजे मृत्युर्बुधे धनम् ।
मानं हन्ति गुरोर्व्वारे शुक्रे शुक्रक्षयो भवेत् ॥
शनौ च सर्व्वदोषाः स्युः क्षौरमत्र विवर्ज्जयेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥ * ॥
अथ प्रथमक्षौरस्य चूड़ाकरणस्य विहितदिनादि । ज्योतिषे ।
"अयुग्माब्दे तथा मासि चूड़ा भौमशनीतरे ।
अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभेतरे ।
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्ज्जिते सिते ॥"
दक्षोऽपि सामान्यतो दोषमाह ।
"षष्ठाष्टमी पञ्चदशी उभे पक्षे चतुर्द्दशी ।
अत्र सन्निहितं पापं तैले मांसे भगे क्षुरे ॥
मेषसिंहतुलाकर्किवृश्चिकेतरलग्नके ।
श्रवणादित्रयस्वातीचित्रापुष्याश्विचन्द्रभे ॥
आदित्यरेवतीहस्ता ज्येष्ठामूले च चौड़कम् ॥
पौष्णाश्विपुष्यवसुरामकवासुदेव-
शक्रार्कचन्द्रवरुणादितिचित्रभेषु ।
वारेषु सोमबुधवाक्पतिभार्गवाणां
क्षौरं करोति कुशलं खलु मानवानाम् ॥"
इति वचनात् रोहिण्यामपि चूड़ाकरणम् ।
अत्रापि तिथ्यङ्गादिविहद्भद्रत्वं विवर्ज्जयेत् ॥
"सूर्य्ये दक्षिणमार्गगामिनि हरौ सुप्ते निरंशे रवौ
क्षीणे शीतरुचौ महीजयमयोर्व्वारे निशासन्ध्ययोः ।
भुक्तेऽभ्यक्ततनौ निषिद्धसमयेऽलङ्कारयुक्ते शिशौ
क्षौरान्नोगभयं वदन्ति यवना मृत्युं तथान्ये जगुः ॥"
राजमार्त्तण्डे ।
"मानं हरेत् क्षौरमिहायुषोऽर्कः
शनैश्चरः पञ्च कुजस्तथाष्टौ ।
आचार्य्यभृग्विन्दुबुधाः क्रमेण
दद्युर्द्दशैकादश सप्त पञ्च ॥"
जीवादिवारे क्षौरं प्रशस्तम् ॥*॥ भोजराजः ।
"शिखिसन्निधाने च चूड़ाकरणं जगुः शुभं यवनाः ।
चैत्रे मासि दिवाकरवारे उत्तरवर्त्मनि सवितरि ॥"
दिवाकरवारविनिर्मोके तु गर्गः ।
"जन्मर्क्षे जन्ममासे च युग्ममासे च वत्सरे ।
न कुर्य्यात् प्रथमं क्षौरं विशेषाच्चैत्रपौषयोः ॥"
ज्येष्ठपुत्रकन्ययोस्तु ज्येष्ठदशाहाभ्यन्तरे चूड़ानिषेधो विवाहप्रकरणे उक्तः । इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च । भोजराजः ।
"यो जन्ममासे क्षुरकर्म्म यात्रां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्त्रनाशं
प्राप्नोति मूढ़ो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
श्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चूड़े विवाहे क्षुरकर्णवेधे ॥"
एतद्विषयभेदस्तु राजमार्त्तण्डे ।
"उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च ।
सापेक्षनिरपेक्षाणि स्मृतिवाक्यानि कोविदैः ॥
सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि ।
क्षुरेति क्षुरकर्म्म ।" इति तिथ्यादितत्त्वम् ॥

क्षौरपव्यं, क्ली, (क्षुरैः पविभिर्व्वज्रैर्निर्म्मितं निर्वृत्तमिव वा गृहम् ।) क्षुरवज्रतुल्यतीक्ष्णदृढ़गृहम् । यथा, श्रीभागवते । ६ । ५ । ८ ।
"नदीमुभयतो वाहां पञ्चपञ्चाद्भुतं गृहम् ।
क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ॥"
"पञ्चपञ्चानां पञ्चविंशतेः । अद्भुतं गृहम् । क्षौरपव्यं क्षुरैः पविभिर्व्वज्रैश्च निर्म्मितमिव तीक्ष्णं दृढ़मित्यर्थः । स्वयं स्वतन्त्रम् । भ्रमि भ्रमणस्वभावम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

क्षौरिकः, पुं, (क्षुरकर्म्म क्षुरेण वा कर्म्म करोति । यद्वा क्षुरिकर्म्म कार्य्यत्वेनास्त्यस्य । इति ठञ् । क्षौरं शिल्पत्वेनास्त्यस्य इति तु ठन् ।) नापितः । इति शब्दमाला ॥

क्ष्णु, ल तेजने । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-सेट् ।) मूर्द्धन्यणकारोपधः । क्षादिः । क्ष्णौति खड्गं कर्म्मकारः । इति दुर्गादासः ॥

क्ष्णुतः, त्रि, (क्ष्णु+कर्म्मणि क्तः ।) शाणितः । तीक्ष्णीकृतः । इत्यमरः । ३ । १ । ९१ ॥

क्ष्मा, स्त्री, (क्षमते सहते भारं अपराधजनितं वात्सल्यात् जीवानां चतुर्व्विधानां इति । क्षम् + अच् उपधायाः लोपश्च ।) पृथ्वी । इत्यमरः ।२।६७।३॥ (यथा, भागवते ।७।८।३३।
"द्यौस्तत् सटोत्क्षिप्तविमानसङ्कुला
प्रोत्सर्पत क्ष्मा च पदातिपीड़िता ॥")

क्ष्माजः, पुं, (क्ष्मा पृथ्वी तस्यां तस्याः वा जातवान् इति । क्ष्मा+जन्+डः ।) मङ्गलग्रहः । इति ज्योतिषम् ॥

क्ष्मातलं, क्ली, (क्ष्मायाः तलम् ।) भूतलम् । (यथा, मार्कण्डेये । २३ । ४७ ।
"यद्यस्ति क्ष्मातले खेऽन्यतो वा
त्वत्सम्बन्धं त्वत्स्वरैर्यञ्जनैश्च ॥")
पृथिवीमध्यम् । इति केचित् ॥

क्ष्माहृतिः, पुं, (क्ष्मायां पृथ्व्यां हृतिर्हरणं पालनोशक्तिर्यस्य ।) काश्मीरदेशीयराजविशेषः । यथा, राजतरङ्गिण्याम् । ५ । ४८२ ।